**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2024 SHISRRJ | Volume 7 | Issue 3
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# श्रीप्रयोगचन्द्रिकायां समावर्तनसमीक्षणम्

**Dr. G V Phaniraja Shastry**
Assistant Professor, Department of Apastamba Pourohitya, Sv Vedic University, Tirupati

**Article Info**

**Article History**
Received : 03 May 2024
Published : 15 May 2024

**Publication Issue :**
May-June-2024
Volume 7, Issue 3
**Page Number :** 55-64

**शोधसारांश:-** विदितचरमेव विद्याध्ययनानन्तरं गुरुगृहात्प्रत्यागमनरुपकर्म एव समावर्तनम्। तस्यैव कर्मणि क्रियमाणपद्धतय: अत्र साररूपेण गृह्य-धर्म-स्मृत्यादिग्रन्थानुसारं प्रतिपादितम्। अनेन शोधलेखनमाध्यमेन शास्त्रानुसारं क्रियमाणस्यास्य कर्मण: वैशिष्ट्यं तथा वर्तमानसमये तस्य प्रामुख्यतां प्रदर्शितम्। जन्मारभ्य मृत्युपर्यन्तं षोडशसंस्कारै: संस्कृत: मानव: जीवने सुखं शान्तिं परमोत्कर्षं साधयति। एवं सति समावर्तनकर्मानुष्ठानेन स्वस्य समाजस्य च औन्नत्यं साधयितुं लेखने तस्य परिचय:, विभाग:,काल:, औचित्यं, अनुष्ठानं प्रयोगं वैशिष्ट्यं च श्रीप्रयोगचन्द्रिकारीत्या प्रतिपादितम्।

**मुख्यशब्दा:**-विद्यास्नातक:,व्रतस्नातक:,विद्याव्रतस्नातक:, सामयाचारिक: धर्म:, वादरमणि:, उपानह:, गुरुदक्षिणा, राति:, अविप्लुतब्रह्मचर्य:, चरितव्रत:।

श्रीप्रयोगचन्द्रिकाग्रन्थमनुस्मृत्य “समावर्तन” इति कर्म प्रोच्यते। वेदाध्ययननिवृत्त्य-नन्तरं यत्कर्म अनुष्ठेयं तत् समावर्तनमिति साङ्गवेदाध्ययनानन्तरं **त्वमिदानीं गृहस्थो भव** इति गार्हस्थ्याय प्राप्तानुमत: समावृत्त: तेन अनुष्ठीयमानं कर्म समावर्तनम्। समावर्तते अध्ययनान्निवर्तते इति। सं-आङ् पूर्वकाभ्यां वृतु-वर्तने धातो: ल्युटि[1] प्रत्यये सति“समावर्तनम्” इति पद निष्पति:। अस्य कर्मण: एव स्नातकमिति नामान्तरमपि विद्यते तत्कुर्वाण: स्नातक:।

**ऋषय: सत्यवचक: स्नातकस्त्वाप्लुतो व्रती।**

**निर्जितेन्द्रियकामा: यतिनो यतयश्च ते[2]।। इत्यमर:**

समाप्तवेदाध्ययनाश्रमान्तरागत: इति ।

**गुरवे तु वरं दत्वा स्नायाद्वा तदनुज्ञया ।**

**वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा[3]।।**

इत्यादि वचनार्थानुष्ठानेन गुरुकुलात् कृतकृत्यस्य समावृत्तस्यानुष्ठेयं समावर्तनापरपर्यायं स्नानाविधं स्नातककर्म व्याख्यायते। **“गुरवे तु वरं दत्त्वा”** इत्यत्र विशेषणम्

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

**आहरिष्यामि किं तेऽर्थं भवतो वचनादिह ।**

**त्वयोक्तं हि करिष्यामि कृतार्थः स्यां गुहेण तु ॥ इति**

**तेनोक्तं च तथा कृत्वा स्नानं शिष्यः समाचरेत् ।**

**अलमर्थेन मे वत्स त्वद्गुणैरस्मि तोषितः[4]॥ इति**

**"गृहाय त्वा अनुजनामि"** इत्यनुज्ञापर्यन्तं कार्यम्। आपस्तम्बोप्याह - **कृतविद्यां यावतीग् शक्नुयाद्वेददक्षिणामाहरेद्धर्मतो यथाशक्ति**[5] गुरोस्सकाशे यावतीं विद्यां वेदं वेदौ वेदान् वा तावतीं विद्यां अधिगम्य गुरवे यथाशक्ति धर्मतः उपलब्धां न्यय्यार्जितां दक्षिणामाहरेत्। तथाप्युक्तम् आपस्तम्बेन **भिक्षणे निमित्तमाचार्यो**[6] इत्यादिना एवञ्च इदं समावर्तनं गुरोर्दक्षिणादानपूर्वकं कर्तव्यम् इत्यवगम्यते । गुरुदक्षिणास्वरूपन्तु

**क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमन्ततः।**

**धान्यवासांसि शाकं वा गुरवे प्रीतिमाहरेत्[7]॥**

अनेन सत्यां शक्तौ गुर्वभिलषितमेव देयमित्युक्तं भवति। **शक्त्या गुर्वर्थमाहरेत्**[8] इत्युक्तत्वात् क्षेत्रहिरण्यादिकं यथासामर्थ्यं गुरवे दद्यात्।

**गुरुशुश्रूषया विद्यां समाप्य विधिवद्द्विजः।**

**स्नायात् गुर्वनुज्ञातो दत्त्वाऽस्मै दक्षिणां हि गाम्[9] ॥**

अथवा गां दद्यात् "गुरवे वरं दत्वा"इति श्रवणाच्च "गौर्वै वर" इति श्रुतेः। तथा च गुरुकुले यथाविधि वेदाध्ययनं कृत्वा गुरुणानुमतः गुरवे दक्षिणां दत्त्वा गृहस्थाश्रमस्वीकाराय नियमपूर्वकं यस्मिन् कर्मणि विशिष्टं स्नानं विधिवत् कर्तुम् उद्युक्तोभवति स स्नातकः। स्नातकेषु त्रैविध्यं वर्तते। यथा - विद्यास्नातको-व्रतस्नातको-विद्याव्रतस्नातकश्चेति।

1. समाप्य वेदमसमाप्य व्रतं यः समावर्तते सः **विद्यास्नातकः**, समापनञ्च पाठतोऽर्थतश्च, अवसानं नीत्वा वेदं वेदस्य मन्त्रब्राह्मणात्मिकां एकां शाखां यः समावर्तते स्नाति सः ब्रह्मचारी विद्यास्नातकः।
2. समाप्य व्रतमसमाप्य वेदं यस्समावर्तते सः **व्रतस्नातकः**, समाप्य व्रतं द्वादशवार्षिकादिकं ब्रह्मचर्यमसमाप्य असम्पूर्णमधीत्य, वेदं एकां शाखां यो ब्रह्मचारी समावर्तते स्नानं करोति सः व्रतस्नातकः।
3. उभयं समाप्य यः समावर्तते सः **विद्याव्रतस्नातकः**। वेदं, व्रतं-ब्रह्मचर्यं च समाप्य अन्तं नीत्वा यः स्नाति सः विद्याव्रतस्नातको भवति।

एवञ्च नियमपूर्वकं वेदाध्ययनं ब्रह्मचर्यञ्च पालयमानः आश्रमान्तरं प्रेप्सुः **स्नानकर्म** करिष्यन् सूर्योदयात् पूर्वमेव व्रजं प्रविश्य अन्तर्लोम्ना चर्मणा व्रजद्वारं प्रच्छादयेत् । आसायं तत्रैव व्रजे तिष्ठेत्। आपस्तम्बोऽप्याह **वेदमधीत्य स्नास्यन् प्रागुदयाद्व्रजं प्रविश्यान्तर्लोम्ना चर्मणा द्वारमपिधायास्ते**[10]।। तत्र हरदत्तः - उपनीतश्चरितव्रतः ब्रह्मचर्योऽधीतवेदोपाऽङ्गं यथाचार्यकुलादन्यमाश्रमं प्रेप्सुर्भवति तस्य स्नानं नाम कर्मोपदिश्यते। स्नानं-समावर्तनं तत्करिष्यन्नित्यर्थः। आदित्योदयात् प्राक्

गोष्ठं प्रविशेत् । अभ्यन्तरं लोमानि यस्य तेन चर्मणा यस्य कस्यचिन्मृगस्य चर्माच्छाद्य आसते। आस-उपवेशने धातुः, आसनवचनं निष्क्रमणप्रतिषेधार्थं प्रयुक्तम्। अस्मिन्नहनि बहिरातपे न निर्गच्छेत्। तत्र गार्ह्यम्- **नैनमेतदहरादित्योऽभितपेत्**[11] एतत्कर्मकुर्वाणः स्नातकः अस्मिन्नहनि कदाचिदपि सूर्याभितपः न भवेत्। मूत्रपुरीषादिकमपि व्रजे छत्रादिना प्रच्छाद्य छायायां कर्तव्यमित्यर्थः। ततः मध्यन्दिने स्नानकर्म करष्ये इति सङ्कल्पयेत् स्नातकः। अग्नेरुपसमाधानादि पात्रप्रयोगकाले

मनुष्यपात्राणि –

**सूत्रे वस्त्रे मणियुगंस्त्रकसुगन्धप्रवर्तौ।**

**शीतोष्णाम्बुक्षुरकटयवछत्रदण्डांजानादर्शोपानहद्वयम्।**

**कुशशकृत्स्नानचूर्णोदुम्बरकाष्ठानि सकृत्प्रयुञ्ज्यात्। इति**

**कपर्दी तु -**

**सूत्रे वस्त्रे मणियुगलसमित्स्त्रक्सुगन्धौ प्रवृत्तौ**

**शीतोष्णाम्बु क्षुरकटयवच्छत्रदण्डाञ्जनानि**

**आदर्शोपानद्वयकुशशकृत्स्नानचूर्णोदपात्रे**

**स्नास्यन् युञ्ज्यात् सकृदिह नरः काष्ठमौदुम्बरञ्च ।।**

सूत्रे- मणियुगप्रोतनार्थे, वस्त्रे – अन्तरमुत्तरञ्चेति द्वयं, मणियुगम् एकस्सौवर्णः अन्यो बादरः स्रक्-माल्यं, सुगन्धः चन्दनादि प्रवर्तौ-सुवर्णकुण्डले, शीतोष्णाम्बु-शीतोष्ण जलद्वयम्, क्षुरं-तीक्ष्णधारम्, आयसं-नापितसम्बन्धि,कटः-एरकाख्य तृणनिर्मितः, अन्यो वा लोकप्रसिद्धः। छत्रम्-आतपत्रं, दण्डो-वैणवः पुरुषमात्रम् अञ्जनं-त्रैककुदं, अन्यद्वा लोकप्रसिद्धम्, आदर्शं-मुकुरम्, उपानद्द्वयं-उपनहौ, कुशाः-दर्भाः, शकृत्-आनहुहं गोमयं स्नानचूर्णं-मलापकर्षणक्षमं, मुद्गमसूरादि चूर्णम्, औदुम्बरकाष्ठं, एतानि मनुष्यपात्राणि प्रयुञ्ज्यात्।

तत्र गार्ह्यं – **मध्यन्दिनेऽग्नेरूपसमाधानाद्याज्यभागान्ते पालाशीं समिधमुत्तरयाऽधायापरेणाग्निं कट एरकायां वोपविश्योत्तरया क्षुरमभिमन्त्र्य उत्तरेण यजुषा वप्त्रे प्रदायापाँ संसर्जनाद्याकेशनिधानात्समानम्**[12]। यथा मध्यन्दिने प्रधानहोमाः भवन्ति तथा कर्म आरभेत। आज्यभागान्तवचनं क्रमार्थम्, **इमगग्स्तोमम्** इति पालाशीसमिधम् अग्नावाधाय, नात्र स्वाहाकारेण जुहोति, चोदनाभावात्, सर्वत्र समिदाधाने नोद्देशत्याग इष्यते। समिदाधानान्तरं कटोपवेशनं, अग्नेः पश्चात् कटे स्वयमास्तीर्णे उदगग्रे उपविशेत्। ततः **त्र्यायुषमिति** मन्त्रेण क्षुरम् अभिमन्त्र्य, **शिवो नामासि** इति यजुषा वप्त्रे-वपनकर्त्रे कस्मैचिन्मन्त्रविदे ब्राह्मणाय तत्क्षुरं प्रयच्छति।

**उष्णेन वायवुदकेन** इत्यादि केशनिधानान्तमुपनयनवत्कुर्यात्। विधिवत्पुनःस्नात्वा द्विराचामेत्। कटः प्रसिद्धस्तृणमयः, एरका कटप्रकृतिभूतं पङ्क्तिकटाख्यं तृणम्, ततः व्रजस्य पश्चिमार्धे उपविशेत्। व्रजं-गवागरं तस्य पश्चादभागे जघनार्धे उपविश्य ब्रह्मचारिलिङ्गानि विसृजेत्। तत्र गार्ह्यं **जघनार्धे व्रजस्योपविश्य विस्रस्य मेखलां ब्रह्मचारिणे प्रयच्छति**[13] उप्तकेशश्मश्रुनखः स्नातकः मेखलां विसृजेत्, ब्रह्मचारि चिह्नानि कस्मैचित् ब्रह्मचारिणे उपकुर्वाणाय प्रयच्छति अर्पयतीत्यर्थः।

तां मेखलां ब्रह्मचारी **इदमहम्** इति यजुषा **तां स उत्तरेण यजुषोदुम्बरमूले दर्भस्तम्भे वोपगूहति**[14] इति गार्ह्यम्। उदुम्बरमूले दर्भस्तम्भे वा निदधति अप्रकाशं करोतीत्यर्थः। इदमहं काश्यपसगोत्रस्य यज्ञशर्मणः पाप्मानमुपगूहाम्युत्तेरो नारायणशर्म द्विषद्भ्यः इत्यूहः कार्यः, अन्यानि अप्सु दण्डाजिनादीनि प्रास्येत्। अत्र भरद्वाजः **समुद्रं गच्छ स्वाहेति** उपवीतं जले क्षिपेत्।

**मेखलामजिनं दण्डम् उपवीतं कमण्डलुम् ।**

**अप्सु प्रास्य विनष्टानि नवान्यन्यानि धारयेत्[15]।।**

अत्र सूत्रे विस्रस्य मेखलामिति मौञ्जीमात्रोक्तावपि ब्रह्मचारिलिङ्गानि त्यजेत्, दण्डाजिनयोरेवाप्सु त्यागः। न तूपवीतस्य, त्यागायोगात्, नित्यं धार्यत्वाच्च, अनुवाकस्य प्रथमेन इत्यारभ्य दर्भस्तम्भे वा निदधाति इत्येवमन्तम् उपनयनवत्कार्यमत्यतिदेशः। ततः परं मन्त्रवत्स्नानम् तत्र गार्ह्यम्, **एवं विहिताभिरेवाद्भिरुत्तराभिः षड्भिः स्नात्वोत्तरयोदुम्बरेण दतो धावते**[16]। मिश्रिताभिः शीतोष्णाभिरद्भिः **आपोहिष्ठा** इति त्रिभिः **हिरण्यवर्णाश्शुचयः पावका**, **यासां राजा यासां देवा** इति त्रिभिः षड्भिर्मन्त्रैः अन्ते सकृदेव स्नायात् अभिषिञ्चेत्।

ततः मन्त्रस्नानान्तरं दन्तधावनं तन्मन्त्रस्तु **अन्नाद्याय व्यूहध्वमिति** तेन औदुम्बरेण उदुम्बराङ्गभूतेन काष्ठेन दतः धावते, दन्तेभ्यो मलमपनयति। धावनं–शोधनम्, ततः स्नानम्, तत्र गार्ह्यम् **स्नानीयोच्छादितः स्नातः** इति स्नानीयेन–मलापकर्षणक्षम मुद्ग–मसूरचूर्णेन चोद्वर्त्य उच्छाद्य ताभिरेवाद्भिः स्नायात्। हरदत्तस्तु– स्नानीयैः–स्नानार्हैः क्लीतकादिभिः उच्चादितः उद्वर्तितः अपकृष्टमलः इति यावत्, क्लीतकम्–हरिद्रा, क्लीतकस्य मलापकर्षणसामर्थ्यसत्वात्, स्नानान्तरं वासः परिधानम्। **उत्तरेण यजुषा अहतमन्तरं वास परिधाय** इति **सोमस्य तनूरसि** इति यजुषा अहतं वासः परिधाय, अहतस्य लक्षणन्तु–

**ईषद्धौतं नवं वस्त्रं सदशं यन्नधारितम्।**

**अहतं तद्विजानीयात् सर्वकर्मसु पावनम्[17]।। इति**

तथा च अत ऊर्ध्वं स्नातकस्य अन्तर्वासः परिधानमेव कर्तव्यम् न कौपीनम्, ब्रह्मचारिणो नान्तर्वासः अस्नातत्वात् कौपीनमेव। येन कटिः प्रच्छाद्यते तदन्तरमित्युच्यते, येन बहिर्नीवि प्रच्छादनम् उपवीतं वा क्रियते तदुत्तरमिति। **स्वोक्तं वासश्च कौपीनं धारयेत्प्रथमाश्रमी**[18] इति भारद्वजस्मृतिः। अन्तरं वासः परिधायाच्छाद्य, आचामेत् नवञ्च परिधायापउपस्पृशेत्, ततः गन्धलेपनम्–गार्ह्यम्, सूत्रं–**सार्वसुरभिणा चन्दनेनोत्तरैर्देवताभ्यः प्रदायोत्तरयानुलिप्य मणिं सौवर्णं सोपधानं सूत्रोतमुत्तरयोदपात्रे त्रिः प्रदक्षिणं परिप्लाव्योत्तरया ग्रीवास्वाबध्य एवमेव बादरं मणिं मन्त्रवर्जं सव्यं पाणावाबध्याहतमुत्तरं वासो रेवतीस्त्वेति समानम्**[19] इति। सार्वसुरभिणा - सर्वैः कस्तूरिकादिभिः गन्धद्रव्यैर्वासितेन चन्दनेन उत्तरैः त्रिभिर्यजुर्भिः देवताभ्यः प्रदाय ततोऽत्मानम् अनुलिम्पति, देवताभ्यः प्रदानन्तु **नमो ग्रहय च** इत्यनेन आत्मानुलिम्पनन्तु **आप्सरस्सु यो गन्धः** इत्यनेन देवताभ्यः प्रदानं नमश्शब्देन, न तु मन्त्रान्तेन **मन्त्रान्तैः कर्मादीन् सन्निपातयेत्**[20] इति परिभाषोक्तिः। तथापि नमश्शब्दस्य प्रदानार्थत्वात्।

देवताभ्यः प्रदाय स्नातकः मुखे एव प्रथममनुलिम्पेत्। **अनुलेपनेन पाणी प्रलिप्य मुखमग्रे ब्राह्मणौऽनुलिम्पेद् बाहूराजन्य उदरं वैश्य उपस्थं स्त्रयूरू सरणजीविनः**[21] इति तथा च **मुखमारभ्य गात्राण्यनुलिम्पेत्स्नातकः।**

एवं **मल्यालिप्तमुख उपलिप्त केश श्मश्रु रक्तोभ्यक्तो वेष्टित्युपवेष्टीति काञ्चुक्यापानही पादुकी** इति समावृत्त धर्मेषु उपलिप्त मुखदर्शनात् मुखमग्रे लिम्पेत इति। ततः **मणिबन्धनम्** सौवर्णम्-सुवर्णविकारम्,सोपधानं-वज्रवैडूर्यादिनोभयतः परिगृहीतं सूत्रोतं-सूत्रप्रोतम्। पूवमुदपात्रे प्रदक्षिणम्, अनन्तरमात्मनः ग्रीवासु आबन्धनम्, उदपात्रप्रदक्षिणन्तु - **इयमोषधे** इत्येतया ग्रीवाबन्धनन्तु-**अपाशो स्युरोमे** इत्यादिकया, उदपात्रे प्रदक्षिणं सकृदुच्यरितया अविरतं त्रिः परिप्लाव्य, **अपाशो.......पुण्याय** इत्यन्तया ऋचा त्र्यवसानायां तं मणिं ग्रीवासु कण्ठे आबध्नीयात्,
कण्ठोगलोऽथग्रीवाय शिरोधिः कन्धरेत्यपि। कम्बुग्रीवा ....... इत्यमरः[22] एवमेव बादरं-बदरीबीजमयं मणिम् एवं कृत्वा सौवर्णमणिदेवसूत्रप्रीतमुदकपात्रे त्रिः परिप्लाव्य सव्ये- वामपाणौ तृष्णीं" बध्नीयात्। तूष्णीं ग्रहणात् परिप्लावने-बन्धने च मन्त्रनिवृत्तिः भवति। एवमित्यस्य तृष्णीशब्दार्थपरत्वे, **मन्त्रवर्जमिति** सूत्रे व्यर्थं स्यात्, एवमित्यतिदेशः। पूर्ववन्मन्त्रवत्प्रयोगे प्राप्ते स मन्त्रः निषिध्यते, मन्त्रवर्जमिति नह्येवमिति मन्त्र निषेधः। अतोऽतिदेश सामर्थ्यात् मन्त्रत एवापां संसर्गः कार्यः, एवञ्च सौवर्ण-बादरमणि बन्धनानन्तरम् उत्तरं वासः विधत्ते वीरराघवसूरिः। अथ मन्त्रवित् कश्चिद्ब्राह्मणः **रेवतीस्त्वेति** अभिमन्त्रयेत् तत्र गार्ह्यम् - **अहतमुत्तरं वासो रेवतीस्त्वेति समानम्**[23] इति उत्तरं-उत्तरीयं वासः **रेवतीस्त्वेति** अभिमन्त्रयेत् **या अकृन्तन्निति** तिसृभिः उत्तरीयं धारयित्वा धृतोत्तरीयं **परीदं वास** इत्येतया अनुमन्त्रयेत् इति। नन्विदमयुक्तम्-**अहतमुत्तरं वासः** इत्यनेन परिधानवासः एव, न तूत्तरीयं वासः तदुपनयनेन समानमिति व्याख्यातत्वात्, **रेवतीस्त्वेति समानमिति** सूत्रकारेणोक्तत्वात् इति केचन। अन्ये तावत् उत्तरीयमेव न परिधानम्, सूत्रे **अहतमुत्तर वासः** इति विहितत्वात्, तदा चेत् आचार्य एव **रेवतीस्त्वेति इत्याद्युपनयेन समानं करोति** इति पक्षान्तरोपन्यासात् किञ्च **तिसृभिः परिधाप्य परिहित मुत्तरयानुमन्त्रयते** इत्यादि आचार्यस्य वाक्यानुपपत्तेश्च नोत्तरीयम् परिधानमेव, परन्तु परिधाप्य, अनुमन्त्रणे च कश्चन प्रयोजककर्ता अनुमीयते। अत्र स्नातके आचार्यस्यासम्भवात् आचार्यकुलान्निवृत्तस्य स्नानं विधीयते तत्र आचार्यकर्तुकत्वाप्रसक्तिरेवेति अयं पक्षः दूषितश्चेन्न! भूयः श्रुतिमिच्छतो वत्सरस्य द्वौ मासौ आचार्यकुले वासविधानमपि वर्तते इति। **निवेशे वृत्ते संवत्सरे संवत्सरे द्वौ द्वौ मासौ समाहितः आचार्यकुले वसेत्। भूयः श्रुतमिच्छन्निति श्वेतकेतुः**[24] इति सामयाचारिकः धर्मः। अपि च श्रूयते आपस्तम्बधर्मसूत्रेषु **स्नातस्तु काले यथाविध्यभिहतमाहूतोऽभ्येतो वा न प्रतिसंहरेदित्येके**[25] तत्र हरदत्तः-वेदमधीत्य स्नास्यन् इत्यनेन विधिना स्नातः तस्मिन्काले यथा विध्यभिहृतमाबद्धं स्रगादि आचार्येणहुतः स्वयमेव वा गुरुसमीपं गच्छन् स्रगादि न विमुञ्चेत्। अनेन अनुमीयते स्नातककाले गुरोः उपस्थितिः तथा च अत्राप्याचार्यकर्तृकत्वमुपपद्यते। तस्मादुत्तरीयमेव, न परिधानम्, इममर्थं स्पष्टमेवाचष्टे समावर्तनखण्डे वैखानसः **वासः** इति वस्त्रं परिधाय, **सोमस्य तनूरसि** इति इत्युत्तरीयं गृह्णातीति **नित्यमुत्तरं वासः कार्यम्** इति नियमात्।

**स्नातकानां द्वितीयं स्यादन्तर्वासस्तथोत्तरम्।**

इति मनुना स्नातकस्य अन्तरीयोत्तरीयविधानात्, एवम् **अजिनं त्वेवोत्तरं धारयेत्**[26] इति **अजिनमुत्तरमुत्तरया**[27] इति उत्तर शब्देन उत्तरीयमेव न परिधानीयमिति सिद्धम्। अपि च उत्तरीयवर्जितस्य केवल कटिवेष्टितस्य परिधानीयस्य नग्नत्वस्मरणात्।

**सायणीये-**

**अकच्छः पुच्छकच्छो वाऽद्वि कच्छः कटिवेष्टितः।**

**यावदास्ते द्विजस्तावन्नग्न एव न संशयः**[28]**।। इति**

अतः कटिवेष्टितवस्त्रस्य नग्नत्वेन कर्मानर्हतापत्तेः। अत्र उत्तीरयमेव विधीयते न परिधानीयमिति केचन मन्वते। अयमेवाभिप्रायः ग्रन्थकृतः वीरराघवसूरेरपि, परिधान- उत्तरीययोः अन्यतरस्य अभिमन्त्रणधारण - अनुमन्त्राणां कश्चन प्रयोजकः भवेत्। सः आचार्यो वा अन्यो विद्वान् यतः **रेवतीस्त्वा** इत्यत्र युष्मदर्थलिङ्गबाधनिवृत्यर्थमिति अयमभिप्रायः, आपस्तम्बस्य परं तु सुदर्शनाचार्यः तात्पर्यदर्शने **अहतमुत्तरं वासः** इत्यनेनापि परिधानमेवोच्यते नोत्तरीयम् । उच्यते- **रेवतीस्त्वेति** समानमुपनयनेनेति वचनात् उपनयने च **तिसृभिः परिधाप्य परिहितमुत्तरया**[29] इति परिधानार्थवासोऽवगमात् पूर्वस्य अहतमुत्तरं वासः इति चोदितत्वाच्च। उत्तरीयं तु **नित्यमुत्तरं कार्यम्**[30] इत्यादि धर्मशास्त्रवचनदत्रापि सिद्धमेव, उभयोः पक्षयोः उत्तरीयं तु वर्तत एव परन्तु धर्माशास्त्रादेव उत्तरीयं सिद्धमति कश्चन, **अहतमुत्तरं वासः** इत्युक्तत्वात्, अनेनैव उत्तरीयं विधीयते इत्यन्यः। अथ प्रधान होमः- **अथोत्तरीयस्य दशायामिति** इति वीरराघवसूरिः। आपस्तम्बस्तु **तस्य दशायां प्रवर्तौ प्रबध्य दर्व्यामाधायाज्येनाभ्यानायन्नुत्तरा आहुतीर्हुत्वा जयादि प्रतिपद्यते**[31] इति तस्य उत्तरवाससः दशायां प्रवर्तौ सुवर्णकुण्डले प्रबध्य सन्नह्य, तावुपायेन दर्व्या अग्रे स्थापयित्वा आज्येनेति परिभाषाप्ताप्तानुवादोऽभ्यानयनविधानार्थः। अभ्यानायमिति णमुलन्तोऽर्थपाठः। अभ्यानायन् प्रवर्तयोरूपरि आज्योनानयनं कारयन्नित्यर्थः। ततश्च स्वयमेव सव्येन हस्तेन स्थापितयोः प्रवर्तयोरुपरि आज्यमानीय तेनैवाज्येन उत्तराः **आयुष्यं वर्चस्यम्** इत्याद्याः अष्टौ प्रधानाहुतीः जुहुयात्। प्रवर्तयोरुपरि आसिक्तेनाज्येन प्रधानहोमं जुहुयादित्यर्थः। आयुष्यं वर्चस्यमिति अष्टावाज्याहुतयः। ततः दर्व्यग्रतः तौ प्रवर्तावपनीय जयादिप्रतिपद्यते। तत् गार्ह्यम्-**परिषेचनान्तं कृत्वैताभिरेव दक्षिणे कर्ण आबध्नीतैताभिस्सव्ये**[32] परिषेचनान्तवचनं आनन्तर्यार्थम्। परिषेचनान्तरमेव एताभिरेव **आयुष्यं वर्चस्यम्** इत्यष्टाभिरेव होमप्रदिष्टाभिः प्रवर्तयोरेकं दक्षिणे कर्णे आबध्नीयात्। **वचनादेकं कर्म बहुमन्त्रम्**[33] सूत्रे सव्येत्युच्यमाने मन्त्राणां विभज्य विनियोगः भवेत्। अतः पुनः एताभिः इति पुनरुक्तिः होममन्त्राणामेव अत्र कर्णाबन्धनकरणत्वेन सूत्रवाक्यसादृश्यानुमितया श्रुत्यैव चोदितत्वात् तैः मन्त्रैः आबन्धनमपि गौण्या कृत्या युक्तमेव। तत्र **कदाचनस्तरीरसि** इति ऐन्द्री ऋक् अनया इन्द्रो मुख्यया वृत्या प्रकाश्यते। कदाचन स्तरीरसीत्यैन्द्र्या गार्हपत्यमुपतिष्ठते इति ब्राह्मण वाक्यगतया ऐन्द्र्येति तृतीयाश्रुत्या गार्हपत्योपस्थानाङ्गत्वम् अस्या ऋचः बोध्यते। अतश्च विनियोगबलादिन्द्र प्रकाशिकायाः अप्यस्याः गार्हपत्यप्रकाकत्वं गौण्या वृत्या अङ्गीक्रियते। तद्वदत्रापि होमीयानामेव मन्त्राणां विनियोगबलात् आबन्धनप्रकाशकं गौण्या वृत्या युक्तमेव इति सुदर्शनाचार्यस्याशयः-तथा च सव्ये कर्णे

द्वितीये प्रवर्तमाबध्नीयात् ततः स्रग्धारणादि **एवमुत्तरैर्यथालिङ्गं स्रजशिशरस्याञ्जनमादर्शावेक्षणमुपानहौ छत्रं दण्डमिति**[34] उत्तरैः मन्त्रैः यथालिङ्गं स्रगादीनि षट्द्रव्याणि आबध्नीत।

स्रग्धारणमन्त्रः–**शुभिकेशिरः** इति

आञ्जनधरणाय –**यदाञ्जनत्रैककुदमिति**

आदर्शावेक्षणाय–**यन्मेवर्चः परागतमिति**

उपानद्धारणाय–**प्रतिष्ठेस्थः** इति

छत्रधारणाय–**प्रजापतेश्शरणमसीति**

दण्डधारणाय–**देवस्यत्वा** इति

तत्र **शुभिके शिरः** इत्यनया एकयैव शिरसि स्रजमाबध्नीत। सूत्रे **स्रज** इति षष्ठ्येकवचनम्। न प्रथमया वा द्वितीयाया वा बहुवचनम्। एवं **स्रजश्शिरसि** इति वचनात् अंसयोः स्रग्धारणं न भवति। तत्राह आश्वलायनः **स्रजमपि बध्नीत, न मालोक्ताम्**[35], **मालेति चेद्ब्रूयुः स्रगित्यभिधापयीत**[36] ।। तथा च **यामाहरत्** इत्येषा ऋक् विकल्पार्था। **एकमन्त्राणि कर्माणि**[37] **अन्ये विकल्पार्थाः**[38] इति परिभाषा वचनात्। स्रजः इति षष्ठीग्रहणात् स्रजः आबन्धनकर्तव्यमिति भावः। ततः **यदाञ्जनमिति** इत्येकयैव सकृदुच्चरितया त्रिककुत्पर्वतजाताञ्जनेन युगपदक्ष्णोराञ्जनं आङ्क्ते। पूर्ववदत्रापि **मयिपर्वतपूरुषम्** इत्यादीनि यजूंषि चत्वारि विकल्पार्थान्येव। अक्ष्णोः न पर्यायेणाञ्जनम्, **तेन वाम्** इति द्विवचनलिङ्गविरोधात्। एवं **यन्मे वर्चः परागतम्** इत्येतया आदर्शावेक्षणं कुर्यात्। तथैव **प्रतिष्ठे स्थः** इत्यनेन यजुषा उपनाहौ चर्मनिर्मितौ युगपदुपमुञ्चते। प्रतिष्ठेस्थः इति द्विवचनमन्त्रलिङ्गात् तथैव तूष्णीं मन्त्रवर्ज्यं छत्रमादाय **प्रजापतेश्शरणमसि** इति यजुषा आत्मानमभिच्छादयति। एवं वैणवं दण्डं **देवस्यवेति** इत्यादि यजुषा आदत्ते। वैणवन्तु **दक्षिणेन पाणिना मूर्धप्रमाणमृजुं सत्वचं सुषिरं युग्मपर्वकं दण्डमाददीत** इति।” ततः स्नातकस्य मौनं विधीयते। ।**वाचं यच्छत्या नक्षत्रेभ्यः**[39] **उदितेषु नक्षत्रेषु प्राचीमुदीचीं वा दिशमुपनिष्क्रम्योत्तरेणार्धर्चेन दिशमुपस्थायोत्तरेण नक्षत्राणि चन्द्रमसमिति**। दण्डग्रहणं कृत्वा वाचं यच्छेत् अवधिस्तु – आनक्षत्रोदयात्, नक्षत्राणाम् उदयः प्रादुर्भावः इत्यर्थः। वाचं यमत्वात् भोजनाभावोऽप्यनुमीयते मौनोत्सर्जनपर्यन्तम्, **आनक्षत्रेभ्यः** इत्यत्र आङ् अत्र मर्यादयां विवक्षितः। उत्तरेणार्धचेन **देवीष्षडुर्वी** इत्यनेन दिशः षडुपस्थाय उत्तरेण **माहास्महि** इत्यर्धर्चेन नक्षत्राणि चन्द्रमसञ्चोपतिष्ठते। त्रचः अर्धं – अर्धर्चं तेन, अर्धर्चेन इति। दिशश्च प्राच्याद्याः चतस्रः ऊर्ध्वा– अधरा च ततः मित्रेण मनोरथाश्रमं प्रति सम्भाषयेत् । **रातिना सम्भाष्य यथार्थं गच्छति**[40] रातिः मित्रम्, रमयतीति तेन सह विस्रब्धं कः आश्रमः प्रतिपत्तव्यः इति आत्मशक्त्यादिरूपं धर्मादिकं निश्चित्य, तेन रातिना सह योऽर्थो धर्मो मोक्षो वा साध्यत्वेनावधृतः तदनुरूपम् आश्रमः गार्हपत्यं मौनं वा प्रतिपद्यते। **बुध्वा कर्माणि यत् कामयेत् तदारभेत**[41] इति धर्मसूत्रवचनेनैव सिद्धे पुनर्वचनं प्रवजतोऽपि सम्भाषणान्तं स्नानकर्म समाचरेदिति।

केचन स्नातकसम्बद्धविषयाः स्तूयन्ते। स्नातककर्मणि **माहस्महि** इत्यर्धर्चेन चन्द्रनक्षत्राणां उपस्थानं विहितम्। अतोत्र चन्द्रदर्शनप्रधानमिति बोध्यते । **सोमराजन्** इति मन्त्रलिङ्गेन नियतेन शुक्लपक्षे एव स्नातककर्म समाचरेत्। यद्यपि **उदगयनपूर्वपक्षाहः पुण्याहेषु कार्याणि**[42] इति सूत्रेणैव सिद्धम्। तथापि विवाहाङ्गतया क्रियमाणे स्नातकव्रते

**क्वचिदपरपक्षोऽपि आश्रियते। तन्निवृत्त्यर्थम् इदं वचनम्।**

**होमादि मौनं ह्युदितेषु त्यक्त्वा ह्युपस्थाय दिशस्त्वृगर्धतः।**

**चन्द्रं द्वितीये नचभानि रातिना सम्भाष्य गच्छेत्सुमनोरथाश्रमम्।।**

**स्नानक्रियायामिह चन्द्रदर्शनं प्रधानमेवेत्यवगम्यतेऽधुना।**

**स्यात्सोमराजन्निति मन्त्रलिङ्गतस्स्नानं न कर्तव्यमशुक्लपक्षके।।**

इति यद्यपि स्नातकव्रतस्य कालं आपस्तम्बोऽप्याह। विद्यया स्नातीत्येके। वेदविद्यया सम्पन्नः स्नानं कुर्यादिति। मनुश्च –

**वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम्।**

**अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत्**[43] ।।

तथा **व्रतेनाऽष्टाचत्वारिशंत्परीमाणेन**[44] परिमाणमेव परीमाणम् छान्दसो दीर्घः। अष्टाचत्वारिंशद्ग्रहणे पादूनम् **अर्धेन**[45] **त्रिभिर्वा**[46] द्वादशावरार्थ्यम् इत्यादीनामुपलक्षणम्। अष्टाचत्वारिंशदादि परिमाणेन व्रतेन वा सम्पन्नः स्यात्। असम्पन्नोऽपि विद्यया इति भावः। **विद्या व्रतेन चेत्येके**[47] विद्यया व्रतेन चोभाभ्यां सम्पन्नः स्नायादित्येके मन्वते।

एवञ्च वेदमधीत्य स्नास्यन्नित्यत्र वेदमधीत्येत्युपलक्षणम्। अत्राह याज्ञवल्क्यः

**वेदं व्रतानि वां पारं नीत्वा ह्युयुभयमेव वा।**

**अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्**[48]**।। इति**

वोपनयनात् वेदं सषडङ्गं पाठतः अर्थतश्च गुरोः अधिगम्य, ब्रह्मचारिधर्माननुष्ठीयमाणः, गुरोरनुज्ञया बाह्याभ्यन्तरलक्षणैर्युताम् कन्यामुद्वहेदिति विवाहार्थमुद्युक्तस्य स्नातककर्म युक्तियुक्तं यथामति श्रीप्रयोगचन्द्रिकामनुसृत्य समीक्षितम्।

## सहायकग्रन्थाः


1. पा–सू–3–3–117
2. अ–को–2–7–47
3. या–स्मृ–1–51
4. सं–म–64पृ
5. आप–ध–सू–1–7–19
6. आप–ध–सू–2–10–1
7. म–स्मृ–2–246

8. अ–र–श्लो247

9. वी–मि–566पृ

10. आप–गृ–सू–1–12–1

11. आप–गृ–सू–12–02

12. आप–गृ–सू–12–03

13. आ–गृ–सू 1–12–4

14. आ–गृ–सू 1–12–5

15. हे–प्रा–396पृ

16. आ–गृ–सू 1–12–6

17. गृ–रा–क–भू–124

18. गृ–रा–क–भू–121

19. आप–गृ–सू–12–07

20. आप–प–02–01

21. आश्व–गृ–सू–3–8–11

22. अ–को–2–08–89

23. आप–गृ–सू–12–08

24. आप–ध–सू–01–13–19

25. आप–ध–सू–01–08–07

26. आप–ध–सू–1–03–10

27. आप–गृ–सू–10–11

28. गृ–र–क–भू–125पृ

29. आप–गृ–सू10–10

30. आप–ध–सू 2–4–22

31. आप–गृ–सू–12–09

32. आप–गृ–सू–12–10

33. आप–प–सू–1–47

34. आप–गृ–सू–12–11

35. आ–गृ–सू– 3–8–12

36. आ–गृ–सू–3–8–13

37. आप–प–सू 1–41

38. आप–गृ–सू–4–12

39. आप–गृ–सू–12–13

40. आप–गृ–सू–12–14

41. आप–ध–सू 2–21–5

42. आप-गृ-सू-01-02
43. म-स्मृ-03-02
44. आ-ध-सू-2-11-2
45. आ-ध-सू-01-02-14
46. आ-ध-सू-01-02-16
47. आ-ध-सू 2-11-3
48. या-स्मृ-वि-प्र-51

**संकेताक्षरसूची**

1. आप-गृ-सू-आपस्तम्बगृह्यसूत्रम्
2. आप-ध-सू-आपस्तम्बधर्मसूत्रम्
3. आप-प-सू-आपस्तम्बपरिभाषासूत्रम्
4. म-स्मृ-मनुस्मृतिः
5. या-स्मृ-याज्ञवल्क्यस्मृतिः
6. वी-मि-वीरमित्रोदयम्
7. आ-गृ-सू-आश्वलायनगृह्यसूत्रम्
8. गृ-र-क-भू-गृह्यरत्नकण्ठभूषणम्